বিদ্যাসাগর বিশ্ববিদ্যালয়

# VIDYASAGAR UNIVERSITY

## Question Paper

## B.A. General Examinations 2022

**(Under CBCS Pattern)**

## Semester - II

## Subject : SANSKRIT

**Paper : DSC 1B/2B-T**

**(Sanskrit Prose)**

**Full Marks : 60**

**Time : 3 Hours**

*Candidates are required to give their answers in their own words as far as practicable.*
*The figures in the margin indicate full marks.*

1. यथेच्छं **पञ्च** प्रश्नाः समाधेयाः (संस्कृतेन देवनागर्य्या च)। 2×5=10

(क) 'कादम्बरी' इत्याख्यस्य काव्यस्य रचयिता कः? काव्यमिदं कथामध्ये आख्यायिकामध्ये वान्तर्भवति?

(ख) चन्द्रापीड़ः कः आसीत्?

(ग) 'कादम्बरी' इति शब्दस्य कोऽर्थः?

(घ) शिवराजविजयकाव्यस्य नायकः कः? को वास्य प्रतिनायकः?

(ङ) शिवराजविजये औरङ्गजेवस्य उपाधिः क आसीत्?

P.T.O.

Vidyasagar University

(च) आश्रमवासिभिः कस्याः क्रन्दनं श्रुतम्? सा कथम् आश्रमसमीपम् आगतवती?

(छ) वासवदत्ता केन विरचिता? कीदृशं काव्यमेतत्?

(ज) कादम्बरीं व्यतिरिच्य वाणभट्टेन रचितं काव्यान्तरं किम्? तच्च काव्यं कथा आख्यायिका वा?

2. यथेच्छं **चत्वारः** प्रश्नाः समाधेयाः 5×4=20

(क) ''अतिगहनं तमो यौवनप्रभवम्''—कं प्रति कस्य उक्तिरेषा? कथं यौवनप्रभवम् अतिगहनम्?

(ख) ''यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः''—उक्तिरियं व्याख्येया।

(ग) ''महतीयं खल्वनर्थपरम्परा''—तात्पर्यं स्पष्टीक्रियताम्।

(घ) शिवराजविजये ब्रह्मचारिगुरोः चरित्रचित्रणं संक्षेपेण क्रियताम्।

(ङ) हितोपदेशे उल्लिखितायाः कस्याश्चित् कथायाः सारः संक्षेपेण लेख्यः।

(च) कस्यचि**देकस्य** टीका लेख्या—

सुबन्धुः, दण्डी

3. यथेच्छं प्रश्न**त्रयं** समाधेयम् : 10×3=30

(क) ''वाणोच्छिष्टं जगत्सर्वम्''—इति वाक्यस्य याथार्थ्यं निरूपणीयम्।

(ख) शुकनाशोपदेशनुसारं राजलक्ष्म्याः चरितं स्वभाषया लेखनीयम्।

(ग) शिवराजविजयानुसारं प्रातःकालीनसूर्यदेवस्य वर्णनं कुरु।

(घ) शिवराजविजयकाव्ये वर्णितस्य ब्रह्मचारिवटुद्वयस्य चरित्रचित्रणं कुरु।

(ङ) संस्कृतसाहित्ये गद्यसाहित्यस्य उद्भव-विकाशविषये कश्चन लघुबन्धो बन्धनीयः।

Vidyasagar University